कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Shri, Ghate shastri.

4416

श्रीगणेशायनमः॥ स्वौजसमौट्छि॥ अत्रोच्यते॥ नामसः नुकारः टाटकारः ङसेरिकारश्च न कर्तव्यः॥ तस्मा
च्छसो न इति सूत्रे तस्माच्छसो न इति क्रियते॥ तेन रामानित्यस्य सिद्धिः॥ न च प्रथमाबहुवचनेपि नकारः स्यादि
ति वाच्यं॥ नजायते निरनुबंधकग्रहणे न सानुबंधकस्येति परिभाषया वारणात्॥ इदानीं औङ इस नज
श्च न ङकारस्स्यात् ङित्वे च ज्ञाने इत्यत्र दोषः ज्ञानम् शब्दात् द्वितीयायाः द्विवचनं औङ् कृते तत्स्थाने शीपादेशे टेरिस
नेन अकारस्य लोपः स्यात्॥ यदि ङकारस्य लोपः स्यात्तर्हि औङः श्यां प्रतिषेध इति वार्त्तिकं किमर्थं तदर्थं सत्यापयति
भसंज्ञानिमित्तं यदात् आसं तत्सर्वं न भवतीति॥ एवं च कुंतराश्रयः कुतः नाम्नि इत्यत्र दोषः नामन् शब्दात्स
षा प्तम्येकवचनं ङि प्रत्यये भसंज्ञायां अत्रापि भसंज्ञानिमित्तक अल्लोपो न इत्यनेन अकारलोपो न स्यात्॥ तर्हि नायं दोषः॥
कुतः विभाषा ङिश्योरिति पृथक्करणसामर्थ्यात् विभाषा ङिश्योरित्यनेन न लोपः॥ एवं टाटकारोपि मास्तु॥ टाङसि
ङसामिस्सूत्रे टाङसिङसामिति क्रियते॥ रामेणेत्यस्य सिद्धिः॥ न च रामस्यात् सूत्रयेन स्यात् सुपां सुलुगिति आ
कारादेशेन तत्रापि नादेशः स्यादिति वाच्यं॥ सरुचारिन परिभाषया सूत्रे ङसि ङसोः सात् स्वे यतः स्वरूपः आकार
स्येव ग्रहणे तेन न दोषः॥ एवं ङसेरिकारोपि व्यर्थः॥ आङ्सि ङसामिति सूत्रे आ ङस् ङसामिति क्रियते॥ रामा
आत् दित्यस्य सिद्धिः॥ न च षष्ठ्येकवचनेप्यैस्यादिति वाच्यं॥ एचो यवायाव इति वदत्रापि क्रमादेव जायते॥ न च युष्मद्
स्य ङ्यामित्यनेन पंचम्येकवचने ऽद् स्यादिति वाच्यं॥ परेण एकवचनस्य चेति सूत्रेण बाधात्॥ न च ङसेरो
रित्यनेन षष्ठ्येकवचने स्मादादेशः स्यादिति वाच्यं॥ तस्य परमाम्रेडितं तस्मिन्निति निर्दिष्टे पूर्वस्य अनेकाल्शि
त्सर्वस्येत्यादि निर्देशात् षष्ठ्येकवचने स्मादादेशो न भवति॥ ङसि ङसोश्चेति सूत्रे ङसश्चेत्येवास्तु इति महल्लाघवं॥ अत
नुकारः टकारः ङकारश्च किमर्थमिति विचारणीयं॥ ॥१॥ ॥ष्ठ॥ नलोपः प्रातिपदिकान्तस्य॥ नेति प्रातिपदि

पदि

Acc. No. ~~4416~~ M-1902 folio - 13

Title - व्याकरण परिष्कारः Xerox - 26.

Author - ?

Date - ?

Sub - व्याकरण

KKSU LIBRARY
RAMTEK
441 106
M-1902
Dist Nagpur

Checked 2012

इति लुप्तषष्ठीकं । पदस्येत्यनुवर्तते । तथा च प्रातिपदिकस्यांतः सन्पदस्यांतो यो नकारस्तस्य लोपः स्यादित्यर्थे हि धाष
ष्ठ्यर्थान्वयापत्तिरिति । प्रातिपदिकसंज्ञकं यत्पदं तस्यांतो यो नकारस्तस्य लोप इत्यर्थः । अत्र नेति विशेषणेन तदंतविधि
नासिद्धेः तद्ग्रहणमेतत्प्रकरणे पदस्येत्यस्यावयवषष्ठ्या वैयधिकरण्येनापि अन्वयसूचनाय । अन्यथा राजानौ म
नोऽभ्यामित्यादौ नलोपः स्यात् । तेन नमादुपधायाद्यायोरो तदन्वयोपपत्तिः । तेन विवस्वंतौ द्व्या दोवत्वं सिध्यति अंतग्र
हणादेव प्रातिपदिके ति लुप्तषष्ठीकं एव पदत्वे पदस्य स्वेनेन संबंधासंभवात् तस्मादेव नेत्यपि लुप्तषष्ठीकं एव पदस्य
नकारेंतस्येत्यस्य संबंधासंभवात् । राजा सखा राजभ्यां राजपुरुष इत्याद्युदाहरणानि । पदस्येति किं । राजानौ रा
जानः । प्रातिपदिकस्येति किं । रामान् सर्वस्मिन् एधेरन् अहन् । नन्वेवं सति पदांते नकाराभावात् पदांतस्येति णत्वनि
षेधो व्यर्थः । स न ज्ञापकः अप्रातिपदिकांतस्य नस्य लोपो नेत्यत्रेति वाच्यं । हे ब्रह्मन् हे पूषन् आर्द्रे चर्मन् इत्यादौ नलो
पनिषेधविषये पदांतस्येति निषेधस्य चरितार्थत्वात् । नन्वेवमपि न ङिसंबुद्ध्योरित्यनारंभणीयमिति स्वप्रकरणे
न ङिसंबुद्ध्योरित्येतस्य णत्वनिषेधेन सिद्धे पदांतस्येति सामान्यनिषेधस्यो क्तार्थज्ञापकत्वसंभवः । यदि प
दांतस्येति निषेधः स्यात्तं णत्वं नाश्रियते । किंतु षत्वप्रकरणीयो । पदांतस्य मूर्धन्य इत्यधिकारो णत्वप्रकरणे
पि स्वीक्रियते रषाभ्यां नो णः इति पाणिनेश्च न क्रियते इति अपदांतस्येत्यस्य सर्वथा वैयर्थ्येन हिर्णमहयां
चकर्त्यं स्यादिति कथमुक्तार्थज्ञापकत्वं तस्य [illegible] किं च कुर्वन्नित्यादौ संयोगांतलोपस्यासिद्
धत्वेन नलोपाभावेन पदांतस्येति निषेधस्य सार्थक्यमित्युच्यते तदापि रामानित्यत्र न दोषः । अतः परस्य रासा
दिनं कारविधानेन सुपि चेति दीर्घसंयोगांतलोपाभ्यां रामानिति सिद्धेः संयोगांतलोपस्यासिद्धत्वेन नलोपा
प्राप्तेः । न च हरीनित्यादेरसिद्धिरिति वाच्यं । तस्य शसो नश्च पुंसि इति न्यासेनातो दीर्घपाशसो नकारवि

धिनाच्च सर्वसिद्धिसंभवात्। अपि च तस्माच्छसो नः पुंसीति सस्य शस्संबंधिपूर्वसवर्णदीर्घात्परो नकार आगम इत्यर्थे रामान् स इति नकारागमे संयोगान्तलोपेनस्यासिद्धत्वान्नलोपो नेति सुवचं नुम् पुंसीति वा न्यासः क्रियेत यद्वा यथान्यासे शसः सकारस्थाने नस् इति सान्तादेशो विधीयते। न चाकारोनुनासिक इत्संज्ञो लुप्यते सकारस्य नस् इत्यादेशे संयोगान्तलोपे तदसिद्धत्वान्नलोपो नेति सिद्धं। रामानित्यादि सर्वं। सर्वस्मिन् इत्यत्र अस्मिन् एधेरन्नर इत्यत्र नः नकारोच्चारणसामर्थ्यात् नलोपो नेति सिद्धं। अथाहन्नि सवशिष्यते तत्रोच्यते हल्ङ्याप् इति सूत्रे ङ्यापः सोरिति न्यासः क्रियते हलन्तात्परे वा सुतिसीनाम् एकाचो संयोगान्तस्य लोप इत्यनेन लोपे सिद्धे। एवं चाहन्नि त्यत्रापि पूर्वसिपोः संयोगान्तलोपस्यासिद्धत्वादहन्नित्यत्र धातुनकारस्य लोपो नेति। ननु प्रथमं हल्ङ्ग्रहणाभावे राजेत्यादौ नलोपसिद्धये नलोपे कर्तव्ये संयोगान्तलोपस्य सिद्धत्वे न ङिसंबुद्ध्योरिति निषेधेन ज्ञाप्यते। तथा चाहन्नित्यत्रापि नलोपः स्यादिति चेन्न। लोपद्वयस्य सजातीयविषयत्वेन नलोपे सुब्विधौ संयोगान्तलोपस्यैव तदर्थं तर नकारलोपस्यैव वा तस्यासिद्धत्वात्। एतेन धीमान् कुर्वन् अभवन्नित्यादौ नलोपो वारितः॥ ननु हे ब्रह्मन्नित्यत्र निषेधाय न ङिसंबुद्ध्योरिति चरितार्थे तत्र लुकः प्राबल्येन संयोगान्तलोपाभावादिति वाच्यं। सोर्लुका लुप्तत्वेन संबुद्धिपरत्वाभावात्। संबुद्धौ नपुंसकानां नलोपो वा वाच्य इति वचने न आवश्यके न सिद्धत्वाच्च। न च सुरां सुनोतीति सुरासुत् तमाचष्टे सुरासयति ततः क्विपि सुराः सुरासौ इत्यादौ सुलोपप्रसंगः। तिसिग्रहणाभावेन तत्साहचर्याभावात् इति वाच्यं। सोरनुनासिकोकारग्रहणेनादोषात्। यथा अतो रोरित्यत्र रोरनुनासिकोकारग्रहणादेव अरुवः अरुहीत्यादौ नत्वं। न च तिसिग्रहणाभावे ङ्याबन्तात्तिस्योर्लोपो न स्यादिति वाच्यं। न स्यपि तिसिग्रहणे पोमान्नित्यादिसादौ लोपस्यानिष्टत्वेन ङ्याप्भ्यां तयोर

संबंधात्॰ ननु प्रथमहल्ग्रहणाभावे उखास्रदित्यादौ पदांते संयोगांतलोपापवादः संयोगादिलोपः स्यात् वसुस्रंस्विति दत्वस्यासिद्धत्वात् तथा च शिष्टस्याप्रसिद्धस्य धातुत्वेन दत्वं न स्यादिति चेन्न सिद्धकांडे वस्वादिषु दत्वमिति पाठात् परत्वाद्दत्वस्यैव प्रसक्तेः। अपरत्वाद्दत्वं भूयमिति चेत् सावपि पदं भवतीति पक्षाश्रयणात्। तथाहि। स्वादिषु इत्येको योगः पूर्वं पदं स्यादित्यर्थः। असर्वनामस्थाने यचीति द्वितीयः यजादौ सर्वनामस्थाने पूर्वं पदं नेत्यर्थः। भमिति तृतीयः। असर्वनामस्थाने यजादौ स्वादौ परे भमित्यर्थः। ननु सावपि पदत्वे राजेसन्न नलोपे सोरुत्वविसर्गौ स्यातां। न च पथिमथीत्यात्वविधानं नलोपात् प्रथमं सुलोपे ज्ञापकमिति वाच्यं। हे पंथा इति सिध्यर्थं तस्यावश्यकत्वात् संबुद्धौ दीर्घस्य नलोपस्य च निषेधात् इति चेन्न। प्रथमहल्ग्रहणाभावे नङिसंबुद्ध्योरिति निषेधेन नलोपे संयोगांतलोपस्यासिद्धत्वज्ञापनेन नलोपात् परत्वात् प्रथमं संयोगांतलोपस्यैव प्रसक्तेः। तथाहि। नङिसंबुद्ध्योरिति षष्ठी स्वीक्रियते उर्दुलुप्तस्येन तत्परत्वासंभवात् एवं च संबुध्यंतस्य नलोपनिषेधो नलोपात् प्राक् संयोगांतलोपं विनाऽसंभवन् तस्य ज्ञापकः तस्मात् उखापः सोरिति न्यासेन नलोपे दोष इति। ननु वस्वादिषु दत्वमिति सिद्धकांडे न पठ्यते अधातुग्रहणे नैवोखास्रदित्यत्रात्वसंतस्येति दीर्घवारणात्। पिंडं ग्रसते पिंडग्र इति यथा। एवं चोखास्रदित्यत्र प्रथमं संयोगादिलोपे दत्वं न स्यात् एवं सुपीः सुपिसावित्यादौ संयोगांतलोपापवादे संयोगादिलोपे र्वोरिति दीर्घो न स्यात्। न च प्रकृतिप्रत्ययसंबंधिवर्णसंयोगादि सस्य न लोपः कृसाहचर्यात् अत एव तिप्यनस्तेः सिपि धातोरुर्वा इति च रितार्थं इति वाच्यं। क्लिष्टकल्पनापत्त्या गौरवात्। एवं नलोपं प्रति संयोगांतलोपस्यासिद्धत्वेपि राजे धत्ते च अत्रे राजा अराजा छत्रमित्यत्र यण २। हे दीर्घलुगादि न स्यात् तान् प्रति संयोगांतलोपस्यासिद्धत्वात् यदि नलोपविषये सु च विभक्ति संयोगांतलोपस्यासिद्धत्वज्ञापनान्नैते दोषा इत्युच्यते तदापि धीमानित्यादौ नलोपविषयसंयोगांतलोपशास्त्रस्य सुविषयसंयोगांतलोपशास्त्रस्य च विषयभेदेन भिन्नतापूर्वापरत्वाच्च नलोपविषये तस्मिन् सुलोपविषयस्य तस्यासिद्धत्वात् तल्लोपो न स्यादिति दोषस्य सोपदत्वपक्षे परिहारेपि नङिसंबुद्ध्योरित्यस्य उक्तार्थज्ञापकत्वेपन संभवति तस्य सप्तम्यंतताया युक्तत्वात्। तथाहि॥ तस्य

सप्तम्यंतत्वे ङौ संबुद्धौ च निषेधसामर्थ्यात् न लुमतेति निषेधो ऽनेन स्यादेवेति चेन्न । एतत्सूत्रस्थसंबुद्धिग्रहणेन संबुद्धौ नपुंसकानां नलोपो वा वाच्य इति सिद्धमिति तेन हे ब्रह्म हे ब्रह्मन्निति सिद्धिः संबुद्धिग्रहणस्यैव फलमिति न तद्रूपे ज्ञापकमिति चेन्न । अत्र ब्रूमः । अस्तु प्रथमं हल्ग्रहणं न तु तिसिग्रहणं हल्ङ्याप्भ्यः सोरित्येव न्यासोऽस्तु एवं च राजेत्यादौ नलोपादि सिध्यति इति नलोपे ऽपि संयोगान्तलोपो ऽसिद्ध एवेति अहन्निति सरूपं अत एव सिध्यति । ननु तिसिग्रहणाभावे अभिनोत्र इत्यत्र अभिनदिति दकारस्य सिपि धातो रुर्वेति पाक्षिके रुत्वे तस्यासिद्धत्वात् रोरित्युत्वे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वात् उत्वं न सिध्यतीति चेन्न । संयोगान्तलोपो रो रुत्व इति सिद्धं ऊहरिवो मेदिनं त्वेति सिध्यर्थं पाठात् । तत्रोत्वविषये संयोगान्तलोपस्य सिद्धत्वे न पूर्वरूपस्याप्यप्रवृत्तेः । न चैवमपि अबिभर्भवानित्यत्र तिपः संयोगान्तलोपो न स्यात् रात्सस्येति नियमादिति वाच्यं । रात्सस्येति पदच्छेदेन तलोपसंभवात् । न च अचर्वर्त् इत्यत्र तलोपप्रसंगः । यथालक्षणमप्रयुक्त इति भाष्योक्तेः । ननु अबिभाराज्यमित्यत्र ढ्लोप इति दीर्घो न स्यात् संयोगान्तलोपस्यासिद्धत्वादिति चेन्न । ढ्लोप इति षष्ठीतत्पुरुषस्वीकारेण लोपनिमित्तभूतढ्रयोर्दीर्घनिमित्तत्वेनानाश्रयणात् । न चानीयरि चचारित्यादौ च दोषः ढसाहचर्येण प्रतिपदोक्तपरिभाषया चरोरिति परनिमित्तरेफलोपस्यैव ग्रहणे न तत्र दोषः । भावस्य सुवचत्वात् । किं च अजर्घाः इत्यादौ सिपि धातो रुर्वेति वा रुत्वस्य लीढः इत्यादौ ढत्वादीनां पित्राज्यमित्यादौ संयोगान्तलोपस्यासिद्धत्वात् ढ्लोप इति दीर्घो न स्यादिति ढ्लोप इत्यत्र ढग्रहणे न लघुसूत्रे अजर्घा इति भाष्योदाहरणे न च तत्तच्छास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमिति सूत्रस्थपूर्वग्रहणेन ढ्लोप इति सूत्रस्याग्रहणेन तत्प्रति तत्तच्छास्त्राणां सिद्धत्वेन पित्राज्यमितिवदबिभाराज्यमिति रूपस्यापि सिद्धिसंभवात् ।

अत्रेदं समाधानं । स्कुदादिभ्यो यङ्लुगन्तेभ्यो लङ् तिप् सिपोः अचोस्कुन् इत्यादौ अचः परस्मिन्निति सूत्रभाष्यरीत्या लकारं सकारविषयसंयोगान्तलोपशास्त्रस्य परविषयत्वात् परस्य दकारविषयसंयोगान्तलोपशास्त्रं प्रति पूर्वविषयत्वात्पूर्वं प्रति चिणो लुङ्न्यायेनासिद्धत्वात् हल्लोपो न स्यादिति तिसिग्रहणं भिनत्तीति सिद्धये । एतद्ग्रहणं बिभेदयेतात्सिद्ध

३

यद्द्वितीयहल्ग्रहणं चावश्यकमिति ॥ न च लक्ष्यभेदाल्लक्षणभेदस्य लक्ष्ययोः पौर्वापर्यस्य च लक्षणे आरोप इष्टलक्ष्यसिध्य
नुरोधी योगविभागवन्नानिष्टसंपादक इति वाच्यं ॥ लक्षणैकचक्षुष्कपक्षे लक्षणं विना लक्ष्येष्टहानिरिति एर्यासंभवात्तदूदमे
वाभिप्रेत्य हल्ङ्यादिसूत्रशेषभाष्ये तस्मादत्राकेया सुलुप्तकलोपः संयोगांतलोपो विशालं न चेद्विलायते द्विहल्ग्रहणं
तिस्याश्च ग्रहणं कर्तव्यमिष्टकं तथाचाहन्निति सिद्धये प्राति पदिकग्रहणमिति ॥ ननु प्रातिपदिकसंज्ञासूत्रे धातुग्रह
णं प्रथमांतमहन्नित्यादौ प्रातिपदिकत्वेन नलोपवारणाय तु क्रियते । तत्र उत्तरवृत्ते नलोपसूत्रे षष्ठ्यंतं कर्तव्यं नावनाप्यहन्नि
त्यादौ नलोपवारणसंभवात् ॥ न च प्रातिपदिकसंज्ञासूत्रेऽवद्रूपं न कर्तव्यं अन्यथा धातोः प्रातिपदिकसंज्ञायां ततः स्वाद्याप
त्तिरिति वाच्यं ॥ धात्वर्थे प्रातिपदिकार्थकर्मकत्वादिविवक्षायां द्वितीयादिकं धातुरूपप्रातिपादकार्थकर्मकत्वादिकं तु नान्यत्रावि
वक्षितं किंतु प्रातिपदिकार्थ एव धात्वर्थकर्मत्वादि कल्पितं ततो द्वितीयादेरप्रसंगात् ॥ पश्यमृगो धावति पचति भूतेरसादेद
र्शनभवनादौ धावनकर्मकत्वपचनकर्तृकत्वादेर्विवक्षायामपि संसर्गत्वेन द्वितीयादेरप्रसक्तेः ॥ कर्मत्वादेः प्रकारत्वे
एव द्वितीयादेर्विधानात् ॥ धात्वर्थभावमात्रविवक्षायां प्रातिपदिकार्थमात्रे प्रथमाया भावे लकारस्य च प्राप्तिसत्त्वेऽपि ध
त्वस्य प्रातिपदिकत्वावकाशात् प्रथमाया भावे लकारेण अपवादेन बाधात् ॥ न च भावलकारोऽपि क्तक्तादिप्रसयां तद्रूपप्राति
पदिकधातुषु सावकाशा इति वाच्यं ॥ तथापि भावलकारविधायकवाक्ये भूवादयो धातव इत्यस्य तदुपस्थितेर्निरवकाश
त्वादिति चेन्न । कर्तृलकारविधायकादौ तदुपस्थित्या तत्सूत्रवैयर्थ्याभावात् धातुरूपप्रातिपदिके प्रातिपदिकार्थमा
त्रप्रथमाप्रसक्तेरपि निरवकाशत्वाच्च । न चैवं परत्वाद्भावलकार एव स्यादिति वाच्यं ॥ स्वौजसमौडिति सूत्रस्थैव सुवि
धायकत्वे[illegible]न तस्य ततोऽपि परत्वात् प्रातिपदिकार्थे स्वादिसूत्राणामेकवाक्यतया वाक्यभेदेन वा तद्व्यवस्थापकत्वेन त

न
त्या

6

तरत्वस्याप्रयोजकत्वान्न। ओःपसूत्रे ऽधातोरिति करणे ऽलिसादेः क्विपि आङ्त्यादौ नलोपानुपपत्तेश्चेति दिक्॥ ननु नङिसंबुद्ध्योरित्युत्तरं। ङौ ति इति सूत्रं कृत्वा तेनाहन्नित्यत्र नलोपो निषिध्यतामिति चेन्न॥ प्रातिपदिकेति महासंज्ञायाः पूर्वाचार्यानुरोधित्वेन टिघ्वादिवदेकाक्षरसंज्ञानुल्लेखेन नलोपविधायकसूत्रे प्रातिपदिकपदोपादानस्यैव तिङ इति निषेधापेक्षया लघुत्वात्॥ २ ॥ ॥

रुधादिभ्यः श्नम्॥ सार्वधातुके कर्तरि॥ अत्रोच्यते॥ श्नित्करणं मास्तु॥ ननु शित्त्वं सार्वधातुकसंज्ञार्थं॥ अन्यथा आर्धधातुकसंज्ञा स्यादिति चेन्न॥ इष्टापत्तेः॥ ननु स आर्धधातुकत्वे भुनक्ति उनत्ति इत्यादौ अतो लोपः स्यात्॥ रुणद्धीत्यादौ गुणः स्यात्॥ तृणेढीत्यादौ इडागमः स्यादिति चेत्॥ भ्रान्तोसि॥ अङ्गाधिकारिण इत एते विधयः॥ न हि भनक्तीत्यादौ भञ्ज् इत्यादेरङ्गत्वमस्ति॥ यस्मात्प्रत्ययविधिरित्यस्याभावात्॥ रुधादिभ्यः श्नम् विधीयते॥ न हि रुधादीनां भञ्ज् इत्यादीनां॥ किं तु भञ्ज इत्यादीनां॥ अन्यथा यथान्यासेन भनक्तीत्यादौ अतो दीर्घो यञीति दीर्घः स्यात्॥ ननु श्नान्नलोप इति विशेषणार्थं शित्करणं॥ न च तत्रापि श्नान्नलोप इत्येवास्त्विति वाच्यं॥ नंदितानंदक इत्यादौ अतिव्याप्तेः॥ नंदेर्नेरित्त्वसामर्थ्यान्नलोपो नेति वक्तुं न युक्तं॥ ननंदतुरित्यादौ कृतेपि नलोपः स्यात्। सिद्धत्वाद्। नाभ्यासलोपाप्रवृत्त्या चाविसामर्थ्यात्॥ एवं तर्हि तत्र योगविभागः क्रियतां॥ नान्नलोपोऽनिदितां॥ ततो हल उपधायाः क्ङिति॥ एवं च नंदितानंदक इत्यादौ नातिव्याप्तिः॥ एवं च शित्त्वं मास्त्विति ॥ श्निनस्तीत्यादौ नलोपानापत्तेः॥ स्पष्टं चेदं भाष्यकैयटयोः॥ इति चेन्न॥ नमो नान्नलोप इति न्यासेनैव तद्वारणात्॥ न हि नंदक इत्यादौ नमः परः नकारोस्ति॥ नन्वेवं नमतेः धातोर्ग्रहणापत्तिरिति वाच्यं॥ नमतेर्नकारोच्चारणवैयर्थ्यापत्तेः॥ न च लोपोच्चारणोभयसामर्थ्याद्धि कल्प्यतामिति वाच्यं॥ तथा सति वा ग्रहणमेव कुर्यात्॥ एवं च सामर्थ्यान्नमते चरितत्वे पारिशेष्यान्नमप्रत्ययस्यैव ग्रहणे॥ मास्तु तत्र विशेषणार्थमपि शित्त्वमिति दिक्॥ ननु श्नसोरल्लोप इत्यत्र विशेषणार्थं शित्करणं॥ न च

7

तत्रापि नस्तोरश्चोर्पेर इत्येकास्तितिवाच्यं॥ तथा सति मांतास्सोर्ग्रहणं स्यात्॥ तथा सति कनेयंङुलुकिंच कांतरसत्रापि स्यात॥ इति चेन्न॥ तत्रापि नमसो
रितिन्यासेनेष्टसिद्धेः॥ न च तत्रापि नमसोरितिन्यासेनेष्टसिद्धेः॥ न च तत्रापि नमतेर्ग्रहणापत्तिरिति वाच्यं॥ असंभवात्॥ तत्र हि ष्टु क्ङिति सार्वधातुके इ
त्यनुवर्तते॥ नहि नमतेरव्यवहितं क्ङित्सार्वधातुकं संभवति॥ ननु अत उत्सार्वधातुके इत्यत्र सार्वधातुकग्रहणं प्रत्याख्यातं तत्कथमिहानुवर्तते॥ ने
द्भावे च न स्यादित्यादौ आशीर्लिङि संभवोस्तीति चेत्॥ एवं तर्हि तस्यनुवृत्तिमात्रं तदनुवर्तते॥ अस्तिसार्वेचेर्पतानमूरुरस्यापि सार्व
धातुके लोपविधानमरुक्॥ अस्तेश्चासार्वधातुके ऽकारो न संभवति॥ अस्तेर्भूरिति सूत्रेः॥ न चायमस्ति॥ एधामास एधामास तु
रित्यादौ॥ एवं तर्हि परत्वसामर्थ्यान्न प्रवर्तिष्यति तस्य च मन उत्सार्वधातुके इत्यत्र भाष्ये॥ तस्मान्न तत्रापि विशेषणार्थं शिष्कर
प
णमिति प्रत्याख्यातमेव॥ ७॥ ॥६७॥
सार्वधातुकार्धधातुकयोः॥ अत्र वदंति॥ पिदार्धधातुकयोरित्येवास्तु॥ यथाश्रुतेपि सार्वधातुक एव न तत्र॥ नेमं
अपिति ङित्वात्॥ कुत सार्वधातुकमपिदित्यस्य कृत्वात्॥ एवं च सार्वधातुकग्रहणं व्यावर्त्यलाघवार्थं पिदित्येव कर्तव्यं॥ त
श्चिं से॥ सूत्रस्यापालित्वनीपत्वात्॥ हितयंत्रितय मिसादावति व्याप्तेश्च॥ स्यादेतत्॥ आर्धधातुकशब्देन धातोरिस
स्याक्षेपादिगतस्य धातोरेव गुणः स्यादिति चेन्नैवं॥ एवमपि खलपूषुत्र पूर्विस्यादव्याप्तिः॥ यासेः॥ खलु घादिभ्यां धातुसा
घ्यापत्यस्य॥ तथा सुपःपि ङित्वं स्यात्॥ नन्वयं पकारः समुदायानुबंधः ननु सप्तमीबहुवचनस्य॥ मपि ङ ङकार
वादिति चेन्न॥ रोः सुपीति सपकारान्तत्र हि सुपूर्वोष्टेन सप्तमीबहुवचनमेव गृह्यते न तु स्वादयः॥ अत एव सप्तमीबहु
वचने परे इति व्याख्यातं॥ ॥८॥ ॥
तिरसस्तिर्यलोपे॥ उदाहरणं॥ तिर्यङ्॥ अत्र वदंति॥ तिरसस्तिर्यचाति वाच्यं॥ तिरसः तिर्यादेशः स्याद्लादौ अंचतौ
परे॥ अचाति किं॥ तिरश्चः॥ ननु तिरश्चेत्यत्रातिव्याप्तिः॥ अल्लोपस्य स्थानिवद्भावात्॥ अचः परस्मिन्निति सूत्रेपं न

8

मीसमानस्यापि स्थितत्वात् ॥ यथान्यासस्तु न भवति ॥ अल्लोपइ सूत्रे हि अस्य अकारस्य लोपाभावो यस्मिन्नि
त्यर्थः ॥ गूकं ध्वादिस्वासरस्तं ॥ एवं च तिरश्च्यः तिरश्चेति रूपं दुःसाध्यमिति चेन्न ॥ अञ्चीति विशेषणसामर्थ्यात्
श्रूयमाणनादिलंग स्यते ॥ अन्यथा विशेषणवैयर्थ्यापत्तेः ॥ अत्रेदं वक्तव्यं ॥ तिर्यञ्चमाचष्टे तिरयपतिद्र सुराउर
त्तं न सिध्येत् ॥ अल्लोपइसूत्रेणु आभीयासिद्धत्वे न टिलोपस्यासिद्धत्वात्तिद्धपि श्प न न्वस्मिन् पक्षे स्थानि
वद्भावादसिद्धत्वाद्वासिद्धमेवेति वाच्यं ॥ तिरश्चिइ सूत्राति व्याप्तिवारणाय श्रूयमाणनादिस्याश्रयणात् ॥
॥५॥ ॥ ॥६॥ ॥इदमो मः ॥ श्वश्रोऽन्यते ॥ इदं सूत्रं न कर्तव्यं ॥ यः सोऽइत्यत्र इदमो
यमसाविति न्यासः ॥ यमस्य अ अकारो मकारपरित्राणार्थः ॥ नन्वस्मिन् न्यासे यस्य कस्यचिदिदमोयमित्यर्थे इदमरा श्चावयवी भर
न स्यदस्यः यमस्यादिति चेन्न ॥ नेदमदसोरकोरिति सूत्रेण न सश्चासाठित्वा एकदेशे ए वर्णे नत्व प्रतिज्ञादिदमशश्चानुव
त्या इदमोऽदमइस्यथाति ॥ नन्वे पमिग्रस्यासिद्धावप्यि अयमिसस्यासिद्धिरिति चेन्न ॥ इदोय पुंसि इसूत्रेण पुंसी
ति न्यासः ॥ उदमो पमसाविति सूत्रमनुवर्त्यं वा व्यभेदेन व्याख्यानात् ॥ नन्वस्मिन् न्यासे दश्चेति सूत्रे मकारानुवृ
त्य भावादिमानिसस्यासिद्धिरिति चेन्न ॥ मदश्चेति न्यासात् ॥ न च अनाप्यक इस त्रे इदमइत्यनुवर्त्तौ अनेकाल्त्वा
त्सर्वस्य आनित्यादेशे अनेनेयस्यासिद्धिरिति वाच्यं ॥ तत्रापि न उत्सकोरंतादेशविधानात् ॥ ननु हलि लोपइ सूत्रे इ
दमोनुवृत्त्या इदमोत्यस्य लोपे आभ्यामिसस्यासिद्धिरिति चेन्न ॥ तत्रापि हलि अ इति न्यासं कृत्वा तत्सामर्थ्यादि
दमो नेत्यस्य उत्पत्त्यादेशो नादोषात् ॥ न चानेनेदस्येति वाच्यं ॥ सामान्ये प्रमाणानोपस्थवतात् ॥ नन्वयकमिसत्रैसे
षइति चेन्न ॥ स्वार्थे परिपूर्णं पदामपि न्यायेन उ अयमिसस्यासिद्धो अनंतरं कुत्साद्यर्थके न अके च अयकमिसस्य
सिद्धत्वात् ॥ तस्मात्त्रैयादशपुत्रोत्सवस्यानापन्न सार्धषट्मात्राकरणप्रयुक्त लाघवेनेदं सूत्रं चिंत्यप्रयोजनं ॥
॥६॥ ॥ ॥६१॥ ॥ ॥

ऐ

५ वृद्धिनिमित्तस्य च ०॥ अदंतत्वं॥ अनिद्भिन्नरके इति सूत्रे कर्तव्यं॥ नह्रुतपस्य तस्माद्भिन्नीयः स्वार्थकः एतद्धिते इतिसू
त्रार्थः॥ न त्रिय पुंस्क इति न्यायेन पर्युदासः॥ साहचर्यं चलितादिकित्व भिलत तद्धित त्वेन च॥ एवं चोदाहरणप्रत्युदाहरणयोः सि
द्धौ॥ संपूर्णसूत्रस्य नोपयोगः॥ न चैवं वैयाकरणभार्यः स्यात् सौ निषेधः स्यात्॥ सन्निधाने वैयाकरणभार्यसौवीरू
पमिति तेष्व खेरेड गतत्वात्॥ न चैहैमीमुद्रिका यस्य सो हैमिमुद्रिकः इत्यत्र निषेधः स्यादिति वाच्यं॥ स्यूऊमानिनोश्चे
त्यस्याल्वरं विकारे इत्यपाठेन पुंवद्भावविधानात्॥ ननु वाक्यभेदः गौरवमिति चेन्न॥ सार्धद्वादशमात्राकरणप्र
युक्तलाघवेन तस्य परास्तत्वात्॥ ॥७॥ ॥घरूपकल्पचेलडु॥ अत्रोच्यते घरूपक
ल्पचेलड्डुव गोत्रमतइते पुनस्तायइति न्यासः कार्यः॥ यूइसत्र इश्च उश्चेति द्वंद्वः॥ एवं च सर्वलक्ष्याणां सिद्धिः॥ न
च ब्रह्मबंधूतरा स्त्रीतरा इत्यादौ विकल्पनीय इति वाच्यं॥ नद्याः शेषस्यान्यतरस्यामिति स्यस्यानेकाचोन्यतरस्या
मिति न्यासः॥ पूर्वसूत्रान्नद्यायूइत्यस्यानुवृत्तिः॥ एकाच इत्यस्य यथाश्रुतन्यासवत्॥ अधुनापि ईकारांतनद्याः सह
संबंधः॥ एवं च उकारांतनद्याः एकाच ईकारांतनद्याश्च यूआदेशोस्त॥ ओनरनद्यादेशे आरूरिति सपर्वेनादोषात्॥
त्र एवं च घोरदशमात्राकरणप्रयुक्तलाघवेन सूत्रं सुवचं॥ ॥८॥ ऊः रामूनद्याम्नीभ्यः॥ अत्रेदं वक्तव्यं॥ ह्रस्वनद्या
नु वौ इत्यस्याग्र इदं सूत्रं पाठ्यं॥ नद्यापद इत्यत्र स्वरितत्वमंगीकृत्य उत्तरत्र अनुवृत्तौ सत्यां॥ ऊः रामन्नीभ्य इत्येव न्यासः
कर्तव्य इति स्थितं॥ न च एतादावेतान्नीग्रामण्याम् स्यादिति सूत्रार्थः॥ एवं स्थिते सर्वेष्टसिद्धिः॥ ॥९॥ ॥
सह्विवहोरोदवर्णस्य॥ अत्रोच्यते॥ सह्विवहोरादिति वक्तव्यं॥ सहिवहोरात्स्यात् ढलोपे सतीति सूत्रार्थः॥ ढलो
पइति सति सप्तमी एवं च ढलोपे जाते जायमानः ओदादेशः अकारस्यैव स्यादिति॥ सोढेति सिद्धं॥ न च उपपद

विभक्तेः कारकमिति न्यायेन निमित्तविषयसप्तम्याः सत्वात् ढलोपस्य त्रिपादीस्थत्वेनासिद्धत्वात् ढस्यासि
द्धत्वादिति वाच्यं ॥ न च निमित्तसप्तम्यंगीकारेऽर्थाधिकारात् ढलोपनिमित्तके वर्णे उ इत्यर्थे निमित्तस्य फलोपहितत्वेन ढलो
पसति आदेशः स्यादिति वाच्यं ॥ फलोपहितनिमित्तमित्यर्थे मानाभावात् ॥ ढस्यादेशोपि पररूपेणासिद्धेः ॥ तस्मादवर्णस्ये
तिन वाच्यमिति स्थितं ॥ अत्रेदं समाधानं ॥ उत्वह्रस्वनामिति स्थिते सिज्लोपस्यासिद्धत्वेन व्यधोऽसिज्लोपे च ढसे ओरा
देशे कृते अतः परत्वाभावात् पररूपस्याप्रवृत्तेः ॥ ॥१०॥ ॥एर्लिङि॥ अत्रोच्यते ॥ ईम्
लिङि इत्येव न्यासः कर्तव्यः ॥ घुसंज्ञानां मास्थादीनां च ईमागमः स्याद्घोदावार्धधातुके क्ङिति लिङि इति सूत्रार्थः ॥ गुणे धे
यादिति सिध्यति ॥ न च माधातोर्लिचि पुकि कृते लोपे आगमविषये तदागमपरिभाषया अप्रवृत्तौ पुका व्यवधानादिमून स्या
दिति वाच्यं ॥ सम्मतेपि अचः परस्मिन्निति स्थानिवत्वेन व्यवधानात् ॥ न च तिङ्जंता क्विपि तन्निमित्तलोपे कौ लुप्तमित्य
नेन स्थानिवत्वाभाव इति वाच्यं ॥ तिङंतात्कर्तृक्विपि एलोपे [illegible]लोपे तदंतस्य हलंतत्वे हलंताद्याचारक्विपू दुर्लभः ॥
अनुपसर्जनादिति सूत्रभाष्येनादोषात् ॥ ॥११॥ ॥कृत्तिय ख्यारीकक् ॥ अत्रो
च्यते ॥ सूत्रेईकक् इत्स्व एवास्तु ॥ सवर्णदीर्घे कृते शाक्तीकयाष्टीकइत्यादुदाहरणानां सिद्धिः ॥ न च यस्येति चेति
लोपेऽनिष्टमिति वाच्यं ॥ इकारोच्चारणसामर्थ्यात् ॥ न च नञ्स्नञीकक्ख्युनिति वार्तिके विशेषणार्थमिति वाच्यं ॥
तत्रापि ह्रस्वस्यैव पठितुं शक्यत्वात् ॥ न चैवमपि तीयादीकक् । स्वार्थे इति वार्तिकेन विधीयमाने ईकक्छियाङी
२ पून स्यात् ॥ तथा च तार्तीयीकौ इति प्रयोगो न स्यात् ॥ वार्तिके ह्रस्वपाठे तु तार्तीयीक इति दीर्घोति न भ्रूयत इति दिक् ॥
॥ ॥१२॥ ॥प्रथमानिर्दिष्टं समास उपसर्जनं ॥ अत्रैवं न्यासः ॥ प्रथमानिर्दिष्टं समा
च सेपूर्वं ॥ एवं उपसर्जनग्रहणं न कर्तव्यं भवतीति लाघवं ॥ ननु परिनिष्ठितविभक्त्या समासे व्यक्षासनिना दिपादे

K K S U LIBRARY
RAMTEK
441 106
M-1902
Dist. Nagpur

६

उभयोः प्रथमानिर्दिष्टत्वाविशेषात् ॥ अन्यतरस्य वा पूर्वनिपातापत्तेः ॥ सिद्धांते तु उपसर्जनमपीति महासंज्ञाबला
त् विशेषणत्वेन तदर्थप्रतिपादकस्यैव पूर्वनिपातः ॥ इदानीं तु संज्ञाभावात् अनियमः स्यात् ॥ ॥१३॥ ॥
स्त्रीपुंसाभ्यां० ॥ इह भाष्ये नञि विहिते स्वादिष्विति पदत्वात् पौंस्न इत्यत्र संयोगान्तलोपः स्यात् ॥ अतः प्रत्ययद्वयमिदं ॥
अत्राहुः ॥ अत्र भाष्ये शब्दाभ्यां अज्येव कार्यं ॥ न सति योगे न स्त्रीपुंसयोश्च नुगागमः ॥ तथा चायं सूत्रन्यासः ॥
स्त्रीपुंसाभ्यामनुगभवनात् ॥ एवं च भसात् पुंसशब्दे संयोगान्तलोपो न स्यादिति ॥ न चैवं स्त्रैणता इत्यादौ यञञो
श्चेति लुक्प्रसंगः स्यात् स्त्रैणतानांसत्वादौ संघातकेऽपरप्रसंगश्चेति वाच्यं ॥ उभयत्रापि गोत्रत्वस्यानुवृत्तेः ॥ प्रव
राध्यायप्रसिद्धस्य भिन्नत्वे ॥ अन्यथा पौत्र इत्यादौ यञञोश्चेति लुक्प्रसंगः स्यात् ॥ एवं च नञ्स्नञ् इति वार्तिके
स्नञ् इत्यस्य ग्रहणं न कर्तव्यं ॥ अभंतसोद्वउञी पूर्वसिद्धत्वात् इति दिक् ॥ अत्र केचित् ॥ चिंत्यमिदं ॥ नुकि सति नस्तद्धि
त इति टिलोपः स्यात् ॥ न च नुगानर्थक्यं ॥ टिलोपप्रवृत्त्यैव नुकः सार्थकत्वात् ॥ यद्यपि स्त्रीशब्दे तस्य सार्थक्यं नास्ति
यस्येति चेति लोपेनापि ईकारलोपसंभवात् ॥ तथापि स्त्रीदेवतावस्य श्रायं इवर्णस्यैव लोपात् परत्वात् वृद्धिः स्यात् ॥ नुकि
तु टिलोपः प्रवर्तेत इति ॥ स्त्रीशब्देपि नुकः सार्थक्यं ॥ तस्मात् यथान्यासमेव युक्तमिति दिक् ॥ अन्ये तु स्त्रीपुंसयोर्निगिवास्तु ॥ आ
गमेऽनवकाशो वक्ष्यत इति तस्य च यस्येति चात्लोपे स्थानिवद्भावात् टिलोपो न भविष्यति ॥ एवं च टिढुनि सूत्रे पौवउञी पूर्वसिद्धौ
नञ्स्नञोरुपसंख्यानमास्त्विति महल्लाघवमित्याहुः ॥ अत्र यच्चिंत्यं नुग्विधानसामर्थ्यादेव टिलोपो न स्यात् ॥ न च टिलोप
प्रवृत्त्यैव नुकः सार्थकत्वमिति वाच्यं ॥ तथासति उमेवार्विदष्यात् ॥ इदं सवधेयं पदुकं ॥ अभंतत्वादेवउञी पूर्वसिद्धत्वात् ॥ वार्तिके
नञ्स्नञ्ग्रहणं न कार्यमिति तत्त्विदं ॥ गोत्रं च चरणैः सहेति जातित्वात् प्राप्तस्य ङीषोपि वृत्तेप ॥ तदर्थं वचनस्य कत्वात् जाति

तीयाभवंतिइतिद्वितीयवाक्यार्थेनघत्स्पती यत्र च त्वे त्वि पक्षे थकारः त्विध्यतीति॥ उक्तसिध
त्वं नु सामर्थ्याद्बाध्यत इति वाच्यं॥ लिट् स्कृ यत्रापि पक्षे द्वितीयापत्तेः॥ न च घसिवसोरिति वार्त्तिके
पठ्यत इति वाच्यं॥ लाघवाभावादिति चेन्न॥ ॐ अस: सीतीदेशोपि अंतरंगपरिभाषया थकारा
प्राप्तेरिसान्नायात्॥ घस्यती यत्र
ननु न संप्रसारणे इति सूत्रं मास्तु॥ यत्र इसादेशे तु असबाधें हलसदेशस्येति परिभाषणात् सिद्धं॥ तेन न दोषः॥
तत्र चांसस्य देशत्वं नामांसस्य समीपवृत्तित्वं। न स्व च व्यवहिताव्यवहितसाधारणं। तेन न दोषः। ध्वापिन।
चली कृव्यते इसादेशे तु ध्यातु पाठे कृपू इति ऌकारगर्भे पठनीये ऋकारपाठं कृत्वा रूपोरो ऌ इति
सूत्रारंभसामर्थ्यादेव तत्र स्योतदर्थेन संप्रसारणे त्रिमास्तु॥ असाधारणफलाभावादिति पू
र्वपक्षनाबीन्यं॥ एवं चेदोषः

13

मजुतद्वितीते १

॥श्रीगणेशायनमः॥ ॥नलोपः प्रातिपदिकांतस्य॥ नन्वत्र नलोपोऽतिङ इत्येवास्तु ॥पदस्येत्यधिकारसंबंधः॥
तथा चायमर्थः॥ तिङं न भिन्नं यत्पदं तदंतस्य नलोपः स्यादित्यर्थः॥ एतादृन्यासे ऽहन्नित्यत्र दोषाभावात्॥
अथ च अर्थवत्सूत्रेऽधातुग्रहणं न कर्तव्यमिति महल्लाघवं॥ न च तिङंतस्य इत्यर्थात् तद्भिन्नं धातुप्रकृतिक
प्रत्ययांतमेव ग्राह्यं स्यात्॥ तथा च नत्रैव नलोपः स्यात्॥ सुबंतप्रकृतिकतद्धितांते मघवन्तर इत्यत्र नलोपो न
स्यात् तथा च मघवाद्रसस्य सिद्धिर्न स्यादिति वाच्यं॥ अतिङ इत्यत्र प्रसज्यप्रतिषेधाश्रयणात्॥ किं
चैतादृशार्थे भाष्यमपि प्रमाणं॥ नन्विदं भाष्यमिसुलं चेत्॥ तथाहि॥ टाङसीति सूत्रे इनात्रौ प्रसाध्याय नादे
शे महदादेशा न विधाय नादेशोपरे एत्वं यागविभागेन साधितं॥ बहुवचनेत्स्वेत्॥ ओसि च॥ तत आङि च॥
आङि चपरे नएत्वं स्यात्॥ तेमण॥ ततः आपः संबुद्धौ॥ आपः एत्वं संबुद्धौ आङि ओसि चेति॥ नन्वेवमनेन
सत्र इत्थिलोपः स्यादिति वाच्यं॥ अनादेशस्य नकारे परे इति विशिष्य विधानात्॥ तथाहि॥ अनाप्यकः॥
नकारे आपि च परे अककारस्य इदमदो न स्यादित्यर्थः॥ सूत्रे अ इति नांतस्य नकारस्तु सस्य नपुंसक
निर्देशः॥ इति भाष्यं॥ नत्र प्रकृतन्यासे तिङंतस्य इत्यस्य पर्युदासत्वे तत्रत्र धातुप्रकृतिकप्रसयांतत्वेन साकञ्च्यांश्र
यणे अनाप्यक इति ईश्रासंगतिः स्पष्टैव॥ ननु रामानि सादौ नलोपापत्तिः॥ न च विधानसामर्थ्यं॥ वि
विसर्गरूपसाधनार्थं तस्येष्टत्वात्॥ इति चेन्न॥ सलोपकरणेन अकारकरणेन वा निर्विसर्गरूपस्यापि
सिद्धत्वात्॥ न च सर्वं स्मिन्नित्यत्र नलोपापत्तिः॥ नचोच्चारणसामर्थ्यादिति वाच्यं॥ सर्वनाम्नेन सस

म्यंतेन साकं चर इत्यनेन समासे सप्तम्याः हलदंतात्सप्तम्या इत्यनेन सप्तम्याः अलुकि नल्लोपे च इस
र्वस्मिन्नूचरे यत्र नलोपस्यासिद्धतया संयोगसंज्ञायां गुरोरनृत इति प्लुतसंपादनेन चारितार्थ्यादि
ति चेन्न ॥ स्मात्तस्मिन्नाविति न्यासे संयोगांतलोपेन तकारनिवृत्तिः ॥ तस्यासिद्धत्वान्नलोपाप्राप्तेः ॥ प
चेरन्नू युजेरन्नू अनयोराख्यातमाख्यातेत्यनेन समासे विनापि प्रत्ययमिति पूर्वपदलोपे यजेरन्नित्यत्रासि
द्धत्वेन लोपः सिध्यति ॥ समासत्वेन प्रातिपदिकत्वात् ॥ इदानीं खनिङंतत्वात् न सिध्येदिति तद्दूषणं ॥ ॥ ७ ॥ ॥
विधिरिति किं ॥ स्त्रीइयंति ॥ नेदं प्रत्युदाहरणमायाति ॥ विधिग्रहणाभावेपि सर्वत्र परे इत्यर्थे स्त्रीकारात् ॥
तद्वदत्रापि स्त्रीकारेण भवामीत्यादीनां निर्वाहे तदादिग्रहणवैयर्थ्ये न विशिष्टत इत्यर्थलाभात् ॥ न च यस्मा
त्प्रत्ययविधिस्तदादि इति योगविभागेन निष्कासितपरिभाषया तदादिग्रहणस्य च रूपलाभार्थं आवश्य
कमिति वाच्यं ॥ तत्रापि प्रत्ययेन तु यस्मादंगमिति न्यासेन सिद्धमिति शंका तदवस्थैति चेन्न ॥ प्रत्यासत्तौ
नत्वासत्यग्राहकत्वादिति तत्वविदः ॥ ॥ गुरोरनृतः ॥ नन्वत्रानंतरस्यापि इति व्यर्थं ॥ गुरोरनृत इति वक्तव्यं ॥
अपिशब्दाभावे दूराद्धूत इति विहितसमुच्चयो न स्यात् ॥ एवं च सामर्थ्यादनंतरविषये लब्धे तद्व्यर्थमिति चेन्न ॥
तदभावे टेरित्यस्य संबंधेन एहिरक भगो रमे इत्यत्र दूराद्धूताविषयीभूतवाक्यसंबंधि गुरोरेकैकमेव
टेरित्यनुवृत्यापत्तेरिति तत्वं ॥ ॥

॥ नस्मिरप यः अ ॥ तेन्यस्मुंजपि त्यरसमा ॥
॥ नत्वाव नि स्यातिइ ॥
॥ःषदेनौ॥

श्री ॥ नाराणशब्दस्य विष्णुपरत्वमेवेति वैष्णवसिद्धान्तः ॥ यत्तु शैवाः नारायणशब्दस्य शिवपरत्वमपि साधयन्ति ॥ त
था हि ॥ नाराणामयनमिति व्युत्पत्त्या भागीरथीजलाश्रयत्वात् नारायणशब्दप्रवृत्तिरिति ॥ नन्वखंडपदत्वाभावा
दत्क्षुभ्नादिषु चेति अप्रवृत्तेः संज्ञात्वाभावात् पूर्वपदात्संज्ञायामिति सूत्रस्याप्यप्रवृत्तौ णकारघटितप्रयोगासंगतिः ॥ विष्णौ तु
संज्ञात्वात् णत्वमिति वाच्यम् ॥ अथ नशब्दस्य कृदन्तत्वाद् गतिकारकोपपदानामिति सूत्रेण सुबुत्पत्तेः पूर्वं समासे सुपि उत
मिति पदत्वाभावात् निमित्तानधिकरणनिमित्तिम पदाघटितत्वरूपअखंडपदत्वस्य नारायणशब्दे सत्त्वात्
निवेत्पिणत्वघटितनारायणशब्दप्रयोगोपपत्तेरिति ॥ तन्न ॥ अखंडपदत्वनिरुक्तपदसंज्ञकत्वरूपपदत्वस्या
निवेशेन पद्यते येनार्थ इति व्युत्पत्त्या विभक्तीनां समभिव्याहारानपेक्षया लोकेऽर्थबोधजनकत्वरूपपदत्वनि
वेशेन अखंडपदत्वाभावात् ॥ अन्यथा गंधर्वगानमित्यादौ णत्वापत्तेः ॥ न च तस्यानित्यत्वेन धनक्रीतेतिवत्सुबंते
न समासे गंधर्वगानमित्यादौ णत्वं न भविष्यति । नारायणशब्दे तु औ स× गतिकारकोपपदानामित्यस्या×ग्रिक प्रवृत्त्यसि
द्धेः ॥ अनित्यत्वस्य लक्ष्यानुसारित्वादिति वाच्यम् ॥ अनित्यत्वे भाष्याद्युपलब्धदृढतरप्रमाणाभावात् ॥ धनक्रीतेत्य
त्र तु क्वचिन्नेति भाष्यप्रामाण्येन ऊँवैधैरिति संभवात् ॥ किंच पदसंज्ञकत्वरूपपदत्वनिवेशे रामवामनादित्यादौ
णत्वापत्तिः ॥ उत्तरपदत्वेनेति प्रत्यय×अजादित्वात्पूर्ववृत्तित्भावः ॥ ×लक्षणनिषेधेन सुबंतत्वाभावात् वामनस्य पदत्वा
भावात् ॥

ऊ षूत्र टि ढ्ढ तिऊपो बाधक एव ओ पगवीति यथा ॥ अस्मिंश्च पक्षे नु गत्याहरणे वार्तिके नुकूसंनियोगौ स्याग्रंता वि
दि सर्वथ इति सिध्यैः य वा नु नु कुर्वि धाने नेति ॥ न कू पक्षे तु ता द्दरणागमस्या प्रासि स्थत्यादेव क्लिष्ट इति बोध्यं ॥ अथवा
स्तु उभाभ्यां नत्र एव ॥ न च पो स्नरु यत्र संयोगांत लोपः स्यादिति वाच्यं ॥ स्त्रीपुंसाभ्यामिस त्र द्विसकारस्य निर्देशमा
श्रि सापिस माधापि तु श्राव्यत्वादिति दिक् ॥ एवं च सो ऽस्तिति सूत्रस्य नस्य ब्रुते इति प्रतीकमुपादाय वध्येः पूर्वमित्यादि ग्रं
नायं ग्रंथः सु ग्रंथ दरले ॥ तत्र स्वमते तु पूर्वं धातुः सो धनेन युज्यते पश्चादुपसर्गेण एवं च पूर्वमेव नस्य प्राप्तिः ॥ प्राचीनमते
तु पूर्वं धातुरुपसर्गेण युज्यते इति पक्षे प्र एधि इति जाते पश्चाद्धातोः स कस्याद्भुकारः धातूपसर्गयोर्विधिः इत्यनयोः
प्राप्तौ धातुस्थापेक्षत्वकारापेक्षया बहिरंगत्वं ॥ एवं पदद्वयसंबंधिवर्णद्वयापेक्षत्वेन बहिरंगमपि तत्रैक
स्मिन्काले एककार्ये विरुद्धधर्मयोरवस्थानासंभवात् इदमेव पक्षमाश्रित्य स्वद्वास्पूर्व इति वार्तिकप्रत्याख्यानपर
भाष्यप्रामाण्यात् सूत्रकारोक्तेः प्राक् धातूपसर्गकार्यविषये तरंगत्वमेव ग्राह्यमिति नियमात् वृद्धिप्राप्तिः ॥ त च वा
र्णपरिभाषया इत्ये वारणं कृतं ॥ तस्यायमाशयः ॥ पदस्य विभज्यान्वाख्याने पक्षे पदसंबंधियावत्प्रकृतिप्रत्ययकल्प
ना ततः कार्यप्रवृत्तिः ॥ तथा च वृद्धिन्त्वयोः प्रवृत्तौ ओं गत्वात् तस्वः ॥ अस्मिन्पक्षे पूर्वोक्तभाष्यप्रामाण्यात्तस्य
यनिमित्तकेकार्यापेक्षया धातूपसर्गयो रजरंगत्वमेव ॥ वाक्यसंस्कारपक्षे तु वाक्यघटकीभूत यावत्प्रकृतिप्रत्ययक
ल्पनायां श्रुतवर्णक्रमेतो लक्ष्यसंस्कारायदा तु वार्णिकयोः समानकालीनप्राप्त्यभावात्परिभाषयावारणासंभवान्नैत
अ पक्षोयं ग्रंथः ॥ वाक्यादयो ध्यपदानि संस्क्रियंत इति पक्षे तु तत्तत्सहघटकीभूतयावत्प्रकृतिप्रत्ययकल्पनाना
स्तीति तस्मिन्पक्षे पूर्वोक्तभाष्यप्रामाण्यात्सूत्रोक्तमंतरंगत्वमेव धातूपसर्गकार्ये ॥ अयं पदसंस्कारपक्ष इत्युच्यते ॥
वाक्यसंस्कारपक्षस्य स्वरूपं तु पूर्वमुक्तमेव ॥ पदस्य विभज्यान्वाख्याने तु पक्षद्वयेपि ॥ एवं च पदस्याविभज्यान्वाख्या

पूर्वपक्ष

नेयं पक्षः समाधित्सितस्य ॥ तत्रैव सूत्रे प्रकृतिप्रत्ययसंमोहस्तु उक्तं ॥ व्याख्यानं च शब्दरत्ने उक्तं ॥ अत्रोच्यते ॥ एधि च ऊरूस
वस्थायां च ऊतिषिद्धं संकर्तव्यं तत्राजादेरिसुपास्यतं एकाचो द्वे इति च तत्र अर्थवत्स्येव स्थान्यादेशभाव इतिसिद्धांतादर्थवेति
स्थान्यादेशभावः कल्पनीयः ॥ तत्रास्माभिरेधरूपस्य धिधू रूपादेशः रूपस्य रूपादेशः एवं च वर्तत एव प्रकृतिप्रत्य
यसद्भावः ॥ न च वार्तिकं तव ॥ तिसत्या कथमनवयवेऽर्थवत्त्वमिति वाच्यं ॥ उत्तरस्यार्थवत्त्वं तु तत्रैव पत्र रूढिविरोधिनीति सि
द्धांतात् ॥ आनुमानिकस्थान्यादेशभावस्य श्रौतस्थान्यादेशभावमूलकत्वात्तदनुरूप एव स्थान्यादेशभावः कल्पनीयः ॥
स च रूपे कल्प्यतां ॥ प्रथमैकाच्त्वं तु एधाजादेः धातोः समानानुपूर्विकं द्विरुच्चारणाघटितत्वादेश इति ॥ एवं च न दोषः ॥
॥ ॥ ॥ ॥१४॥ ॥ ॥ ॥

इको यणचि ॥ अत्रोच्यते ॥ सूत्रे इक् पदं माऽस्तु ॥ तथा च ह्रस्वस्य पिति कृति तुक् इत्यतः ह्रस्वस्येत्यनुवर्तते ॥ दीर्घा इति
सर्वसूत्रे चाऽदीर्घादित्यस्य विभक्तिविपरिणामेन षष्ठीत्वं ॥ एवं च ह्रस्वस्य दीर्घस्य च यण् स्यादचीत्यर्थः ॥ न
न्वेवं गंगोदकमित्यादावपि यण् स्यादिति चेन्न ॥ परेण गुणेन बाधात् ॥ एवं गंगौघ इत्यादावपि वृद्ध्या
बाधः ॥ तस्मादिक्पदं न पठनीयमेव सन्नः ॥ न च मायायावर इत्यत्र यातेर्यङन्ताद्वरच् अतो लोप इत्यनेन यङकारलोपस्य लो
स्य इत्यनेन न यकारलोपे अतो लोपस्य स्थानिवत्त्वात् या या इति द्वित्वाकारस्य यण् स्यादिति वाच्यं ॥

॥ तस्माच्छसो नः पुंसि ॥ अत्रोच्यते ॥ सूत्रे तस्मात् ग्रहणं माऽस्तु ॥ तर्हि शसो नः पुंसि इति न्यासः क्रि
यते ॥ अत्र सूत्रे अकः सवर्णे दीर्घः इति सूत्रात् अक इत्यनुवर्तते ॥ कोऽर्थः ॥ अकः परो यः शस्तस्य
नः स्यात् पुंसि इति सूत्रार्थः ॥ अतः तेन रामानित्यस्य सिद्धिः ॥ तर्हि हरीन् इत्यादौ दोषः ॥ तेन हरी

18

नुम्निषेधादौ दोषो नास्ति ॥ कुतः ॥ नहि तत्र सूत्रेनुकृतौ ॥ नहि विश्वपः इत्यादौ दोषः ॥ त
त्र किं असितत्र विश्वपा इत्यादौ सम्प्रयोगे तेन तदनंतरं आतो धातोरिति लोपे स्थानिवत्तात् नुम् स्यात् ॥
(तत्र स्कोः संयोगाद्योरिति सलोपे सर्वेष्टसिद्धिः ॥ न चानिष्टत्वात् सवर्णदीर्घेत तस्मात् परत्वात् स भवति ॥ अकः सः सव
किंच ॥ अनवकाशत्वात् न बाधकः सवर्णदीर्घस्य ॥ न च प्रवृत्तित्वइआवेन दुत्तें नरप्राप्तिः ॥ किंच ॥ तित्तउक्त्र हेपितदुत्तरप्राप्तिः ॥
येननाप्राप्तिन्यायेन न बाधकत्वं वक्तुं शक्यं इति (२०) न च सोलितहनास्येव वक्तुं इति वाच्यं ॥ नहि रामाभिश्च स्यात् सिद्धिः स्यात् ॥ न सिध्य
र्थेत दृश्यकारे उक्तस्थले दोष ॥ नाव दस्थेयव ॥ अस्मिन् पक्षे सरन्त ॥ स्थानेष ॥ बेय ॥ न तु अवयवषष्ठी ॥ ना संभवः ॥ तिन कुरुद्धे
॥ नलोपप्राप्तेः ॥ २० ॥ उदाहरणं राजा ॥ अत्रोच्यते ॥ इह प्रातिपदिकांतग्रहणं मास्तु ॥ तथापि हि पदस्येति प्रकृते न चावि
शेष्ये ॥ नांतस्य पदस्येत्यर्थः ॥ स चालौकिकं सपरिभाषयं यस्मात् नस्य आसन्नेव सादिसिद्धौ ॥ न च रामाभिर्यादावपि
लोपः स्यादिति वाच्यं ॥ तस्मात् ह्रस्वोनः पूरणीति नकारविधानसामर्थ्यात् ॥ अन्यथा लोपपरत्वं विदध्यात् ॥ अत
न्ति पादे इत्यत्र अत्रेति लोपस्य बहिरंगत्वेनासिद्धत्वात् न नलोपः ॥ सर्वस्मिन् न पञ्चैरन्निस्यादौ नकारोच्चारण
सामर्थ्यात् इति ॥ अत्र वक्तव्यं ॥ प्रातिपदिकग्रहणाभावे पञ्चैरन्निहासौ नलोपापत्तिः ॥ न च नकारोच्चारण
सामर्थ्यादिति वाच्यं ॥ लिङ्गत्वेति नरपिपञ्चेतरामि सा सेनाह्रस्येति नुड्विधानेन नकारोच्चारणस्य चरितार्थ
त्वात् ॥ नाह्रस्येति नलोपापवादः ॥ नाप्राप्ते नडारं १ आदिति तद्विषये नलोपो न प्रवर्तते ॥ न चैवमंतग्रहणं व्यर्थ
मिति वाच्यं ॥ पदाधिकारोविशेषणमिति सापयितुं अंतग्रहणमिति भाष्ये स्पष्टमिति दिक् ॥ ॥१६॥ ॥
॥ ॥ नचवाहाहैवयुक्ते ॥ अत्रोच्यते ॥ न चादपंचयुक्ते इत्येव सूत्रमस्तु ॥ याद्देच्यादेनेव क्रमेण चादयः
पठ्यंते ॥ तथा च पदलाघवं मात्रालाघवं च ॥ तथाहि यथाश्रुतस्य सूत्रस्य सप्त पदानि सार्धपंचदशमात्राः ॥ न चा
दिपंचयुक्ते इत्यस्य तु पंच पदानि सार्धद्वादशमात्राः ॥ तस्मात् लाघवाय अयमेव न्यासः कर्तव्यः ॥ ॥१७॥

पंचमीसमा ॥
नुम् स्यात् ॥
र्णे रैणविशेष
णात् ॥

तेपिदीर्घेतस्य संभवात् ॥ सिद्धांते तु अ
दुः भवमलक् अवयवषष्ठी व्याख्यात

८ गंधस्येदुत्पूति०॥ उत्पूतिसुसुरभिभ्यो गंधशब्दांताबहुव्रीहिः तस्येकारादेशो भवतीति सूत्रार्थः॥ न चात्र अलोंत्यस्येत्यनेन अंत्या
देशः॥ आदेः परस्येति तु न प्रवर्तते॥ कुतः समासांतप्रत्ययाधिकारात्॥ नन्वस्य प्रत्ययत्वेपि न क्षितिः॥ न च प्रत्ययः परश्चेत्यने
न स्यादेरेव परः स्यादिति वाच्यं॥ यस्येति चेत्यनेन भसंज्ञके प्रत्ययपरे लोपविधानात्॥ न च सूत्रे षष्ठ्यंतश्रवणात्तु इति
वाच्यं॥ गोपाद्धमिति सूत्रे षष्ठ्येन लोपे प्रत्ययपरि-याधिकारश्रवणात् यथा पंचमी व्यत्ययात् तदा॥ तस्यादित्योऽत्रास्य परत्वेपि न
क्षितिः॥ न चादेशो नित्यात् नित्स्वरितेन मिति निः स्वरं कुतो नेति वाच्यं॥ ने[illegible]स्य उच्चारणार्थप्रत्ययत्वानुपपत्तिरिति
दीक्षितमते॥ भट्टमते तु उच्चारणार्थानामपी संज्ञा होरेव निवृत्तिस्तदा स्वरितेनाधिधायके सूत्रे प्रत्ययग्रहणं कार्यं॥ दे
ननु यथारूपसूत्रेपि अन्यन्यपदार्थे आपत्तिके सति कुतो नेयत आह॥ तदेकांतग्रहणं कर्तव्यमिति॥ अस्यार्थः॥
तदेकांतमित्यत्र षष्ठीतत्पुरुषः तस्य एकांतस्तदेकांतः॥ तस्येत्यनेन अन्यपदार्थो ग्राह्यः॥ एकांतशब्देन अवयवस
मूहः॥ अवयवो हि विभागेन लक्ष्यमाणो नभवति तथायं॥ अविभागेन लक्ष्यमाण इति फलितोर्थः॥ ननु षष्ठ्यां तस्या
उपमानोत्तरपदेन समासे किं फलमिति चेत्॥ उच्यते॥ गंधशब्दस्य गुणवाचकत्वात् द्रव्यस्य अवयवत्वेन प्रसि
धत्वाभावात् मूलानुसारेणोक्तं॥ भाष्यमते तु केवलषष्ठीतत्पुरुष एव तस्य एकांतः तदेकांत इति॥ एकांतशब्देन
अवयवः॥ न च गुणवाचकस्य अवयवत्वं कथमिति वाच्यं॥ अयुतसिद्धावयवानुगततत्समूहो द्रव्यमिति मतेन
व गुणस्याप्यवयवत्वसंभवात्॥ स्पष्टं चेदं कैयटे स्वरे च स्पष्टं॥ ॥१७॥ ॥जराया जरसन्यतर०
अत्रोच्यते॥ जरस्यामसउः वेत्येवास्तु॥ न त्र सकारोत्तर अकारोऽविवक्षितः॥ ङि चेत्संतादेशः॥ लिंगविशि
ष्टपरिभाषया जरशब्दस्यापि स्यादिति सकृतेपि सिद्धिः॥ नाचं विनाव्यंजनस्योच्चारणमिति भाष्यात्॥
अकारकरणमिति भावः॥ अत एव तत्र गोरभाव इति बोध्यं॥ ॥१८॥

अथवद् धातुर् प्रत्ययः प्रातिपदिकं ॥ अर्थवत् अधातुः अप्रत्ययः प्रातिपदिकं बहुपदमिदं सूत्रं ॥ धातुभि
न्नं प्रत्ययभिन्नं प्रत्ययांतभिन्नं यदर्थवच्छब्दरूपं तत्प्रातिपदिकसंज्ञं स्यादिति सूत्रार्थः ॥ राजन् ङस् पुरु
३ ष सु इति समासोऽपि धातुभिन्नः प्रत्ययभिन्नः प्रत्ययांतभिन्नो भवती सोऽर्थवत्सूत्रेणैव प्रातिपदिकसं
ज्ञा पाः सिद्धत्वात् । कृत्तद्धितसमासाश्चेति सूत्रे समासग्रहणं नियमार्थं ॥ कथं नियमः ॥ यत्र संघाते
पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैवेति तेन न गामानयेति वाक्यस्य प्रातिपदिकसंज्ञा न ॥ तत्र
प्रातिपदिकसंज्ञायां ॥ सुपो धातुप्रातिपदिकयोः ॥ एनयोरवयवस्य सुपो लुक् स्यादिति सूत्रेण गोऽ
श्वा नर उभमः लुक् कृत ॥ यत्र संघाते पूर्वो भागः पदमित्यत्र पदशब्देन स्वातंत्र्येण प्रयोगार्हमर्थवद् गृह्यते
तेन बहुपटव इत्यत्र प्रातिपदिकसंज्ञाव्यावृत्तिर्नियमेन न भवति ॥ तत्र प्रातिपदिकसंज्ञायां फलं पटु
जस् इत्यत्र ॥ विभाषा सुपो बहुच् पुरस्तात् ॥ ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात् सुबंतात् बहुज्वा
स्यात् स च प्रागेव न तु परतः ॥ इत्यनेन पटुजस् इति सुबंतस्य पुरस्तात् बहुच् प्रत्यये ॥ चितः ॥ चकू
र संज्ञकस्यांतोदात्तः स्यात् स च चितः सप्रकृतेर्बहुकजर्थम् इति वार्तिकेन प्रकृतिप्रत्ययविशिष्ट
स्यांतोदात्तो भवति । तत्र बहुपटुजस् इति संघाते पूर्वो भागः बहु स्वातंत्र्येण प्रयोगार्हो न भ
वतीति नियमशरीरे एनं स्याप्राप्ते ह्यर्थवत्सूत्रेण प्रातिपदिकसंज्ञा भवति प्रातिपदिकसंज्ञा
यां सुपो धातिल्यनेन जसो लुकि तस्मात् सु न जसि बहुरुपस्य प्रकृति पटु इति संपन्नं ॥ तस्याच प्रवृत्ति
प्रत्ययविशिष्टबहुपटुतस्यांतः उकारः अजंतांग जसि चेत्यनेनोकारो गुणः सोऽपि स्यान्नेनरनमपरिभा ओ

21

मयाउदात्तः तस्य एचोयवायाव इत्यनेनावादेशः सोपि तथैव परिभाषयाउदात्त इति बहुपटव इत्याकारकंम
ध्योदात्तं भवति प्रातिपदिकसंज्ञायाः अभावे नेडुइ यस्य पटुजस इति प्रकृतिर्भवतीति जसकारस्य उदा
त्तः स्यात् । पदशब्देन पदसंज्ञकमित्युक्तं चेदपि बहुपटव इत्यत्र न दोषः ॥ तथापि वृषेपवस्कार इति समा
सपूर्वभागस्य भत्वात् पदसंज्ञकमिति वक्तुं न शक्यत इति स्वातंत्र्येण सेतपर्यंतमनुधावनं पूर्व इत्य
नेनाक्षिप्तं परमपि स्वातंत्र्येण प्रयोगार्हमस्तीति तेन पुत्रकाम्ये सादौ न दोषः ॥ तत्र हि पुत्र अमू इति द्वि
तीयांतात् काम्यच्प्रत्ययेनेन काम्यच्प्रत्यये उत्तरं काम्ये साकारकं स्वातंत्र्येण प्रयोगार्हं न भवतीति ए
तस्यापि समासशरीरे अप्रवेशात् नियमेन संज्ञायाः तव्यावृत्तिः पुत्रकाम्ये यस्य प्रातिपदिकसंज्ञायां
तस्मा[illegible] डापि सकुबुसजौ इत्यादिलोपे पुत्रकाम्ये यस्य सिद्धिः तत्र पूर्व इत्यनेनाक्षिप्तं परमपि स्वातंत्र्येण
प्रयोगार्हं मत इत्यत इत्येतद्विषये भाष्यमुपष्टंभकं वर्तते । तथाहि प्रत्ययग्रहणे यस्मात्स विहितस्तदादे
स्तदंतस्य ग्रहणमिति परिभाषायाः असर्वीकारे देवदत्तो गार्ग्य इति समुदायोपि यञन्तो भवतीति तद्धि
तांतत्वात्प्रातिपदिकसंज्ञा स्यात् तस्याश्च तत्सांसरूपो धातुलिंग इत्यनेन देवदत्तो नरस्ते लुक् स्यात् इति प्र
पा सज्यग्रहणपरिभाषास्वीकर्तव्या ॥ नियमेन तु प्रातिपदिकसंज्ञायां न व्यावृत्तिः गार्ग्य यस्य स्वातंत्र्येण प्रयो
गार्हत्वाभावात् नियमशरीरे तस्याप्रवेशात् प्रातिपदिकसंज्ञास्यादिति प्रत्ययग्रहणपरिभाषायाः स
म्यक्फलमुक्तं ॥ यत्र संघाते पूर्वोभागः पदम् उत्तरस्त प्रत्ययोन्ते निदिधिक्षितो तत्र नियमेनाप्येतादृशं

॥ वृषण्वस्वश्वयोः ॥ वस्वश्वयोः परतः वृषण्
शब्दस्य भसंज्ञास्यात् ॥

षडुभ्यो लुगिति सर्वे विहितं विभक्तेः षणोः तु परम कर्ता स्यादि लोपः ॥ बहुपटवः बहू सस्य प्रातिपदिकस फलं तु बहु
परो मायशोदरी स्यादि माध्यादेशः ॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकं ॥ अत्रार्थवदत्सुबंतं प्रातिपदिकाम
सिवरत्नयमपि तु मुच्यते ॥ न च प्रत्ययस्य संज्ञा स्यादिति वाच्यं ॥ निष्फलत्वात् ॥ संज्ञा हि कार्यार्था ॥ न केवला प्रकृ
तिः प्रयोक्तव्या न केवलः प्रत्ययः प्रयोक्तव्य इति निषेधात् ॥ न च प्रत्ययान्तस्यापि स्यादिति वाच्यं ॥ कृत्तद्धि
तविधापनेः ॥ नन्वेवं तिङन्तस्यापि स्यादिति चेन्नैवं ॥ ज्ञापकेन वारणात् ॥ अत्रैव ज्ञापकं तिङश्चेति सूत्रं ॥
अन्यथा प्रातिपादिकादेः स्याद्धि कार्य इति ज्ञापने तमविस्यादिनैव सिद्धे तद् व्यर्थं स्पष्टमेव ॥ धातोः संज्ञाभावे
संज्ञायां नास्ति दोषः ॥ स्यादीनामनुत्पत्तेः तिङादिभिर्बाधात् ॥ तथा च निष्फलत्वात् संज्ञानेव प्रवर्तते ॥ स
माधं तानामुष्येवमेव ॥ तथा च ज्ञापिनातिप्रसंगः ॥ एवं चोत्तरसूत्रे वक्तव्यतन्त्र हणोरिहाप्रत्यया धातुप्रत्य
यं च मा स्थिति लाघवेनैव सकलेष्टसिद्धिः ॥ ॥१९॥ अथ वद धातुरप्रत्ययः प्रातिपदिकं ॥ अत्रार्थवद
विभक्ति प्रातिपदिकं ॥ इत्येवास्तु ॥ तत्र धात्वादेः संज्ञा न भवतीत्युक्तमेव ॥ उत्तरस्मिन्पक्षे तिङश्चेति ज्ञापक
प्रयत्नमपि न भवति ॥ स्यादेतत् ॥ ततः ॥ तदा ॥ तत्र स्यादेः प्रातिपदिकसंज्ञा न स्यात् ॥ प्राग्दिशो विभक्तिरिति
हितस्य विभक्तित्वात् ॥ इति चेन्न ॥ विभक्तिवद्दीतितन्त्रं क्रियते ॥ तत्रात्रास्यैव तिसस्सम्पत्तावृत्तिः ॥ एवं च वि
भक्तौ परे यानि कार्याणि त्यदादीनामत्वादीनि तानि भवंति ॥ न तु विभक्त्यंते यानीति ॥ ॥२०॥ ॥
हलि लोपः ॥ इदोय् पुंसीति सूत्रादिद इत्यनुवर्तते ॥ अनाप्यकः इति अकः इति च ॥ अत्रोच्यते ॥ रत्यः इत्येव
सूच्यतां ॥ तथा च अककारस्य इदमु इदः अकारादेशः स्यात् ॥ एवं चाकारादेशे कृते आभ्यामाभिरिति सिद्धं
नन्वस्मिन्न्यासे आभ्यामित्यादि न सिध्यति ॥ अलोन्त्यस परिभाषा इरनोपतिष्ठते ॥ नानर्थके इति निषेधात् ॥ न च
सवर्णदीर्घ एवं न प्राप्नोतीति वाच्यं ॥ पररूपस्य तदपवादत्वात् ॥ एवं च निर्बाधोयं पूर्वपक्षः ॥ ॥२१॥

शीङः सार्वधातु०॥ अत्रोच्यते ॥ सार्व॰ धातुकमपिदित्यत्र शीङो नेति वक्तव्यं । अयङ् यि क्ङितीत्यत्र शीङ इति च ॥ ॥
॥२४॥ ॥ लशक्वतद्धिते ॥ अत्रोच्यते । इह सूत्रे लशयोर्ग्रहणं न कर्तव्यं । ल्युट् शासि इत्यादौ लुट्युट् जसित्याद्येवास्तु । त
स्य चुटू इत्यनेन न इत्संज्ञा भविष्यति । लितीति स्वरविधायके ठितीत्येवास्तु ॥ णल्ण्वुलित्यादौ णल्ण्वुठ इत्येव कर्तव्यं ॥ न
नुट्सुट्दिकारस्य आयनेयीत्यादिना एयादेशः स्यादिति चेन्न । ङितोरीयङ् सम्भवते छङ् इत्येव वक्तव्ये इयङ् विधा
नेन धातुप्रत्ययादीनामायेयादयो न भवंति । स्पष्टं चेदं भाष्ये । यङ्कफादिसाहचर्येण तद्धितानामेव चछादीनां
ग्रहणात् ॥ ननु साहचर्यमनित्यमिति चेन्न । औत्सर्गिकप्रयत्नो बाधकाभावात् । किंच । आयनेयीतिसूत्रे साह
चर्यमेव सूत्रप्रणेतोभिप्रेतं । अन्तइवगाचांष्फक तद्धित इति सूत्रे तद्धितग्रहणं चरितार्थं । न च प्रातिपदिक
संज्ञार्थं तदिति वाच्यं । लिंगविशिष्टपरिभाषयैवेष्टसिद्धेः । लशक्वास्फुरेरपि विध्यर्थं तदिति मनोरमायां स्प
ष्टं । इति च आस्फुरे रूपसंख्यानमिति वार्तिकेनैवालं सिद्धेः । न चार्थसिद्धं तद्वचनमिति वाच्यं । किमिह यमंता
दित्यनुवर्तिः फापिफा आस्फुरेरूपसंख्यानमिति वार्तिकवार्तिकं चा उ आयनेयीत्यत्र साहचर्यस्याधारः उपदेश इत्या
दिसूत्रचक्रारम्भो गादित्यभिविनिगमनाविरहेणो भयशाप्यस्यापि सूचकत्वादिति दिक् । न च स्यस्तौ तद्धितनिगम
वं । तथा हि उपदेश इत्यादौ चक्रो घकारस्येत्संज्ञायां लोपात्तद्यादेशो न भविष्यतीति तद्यादेशविधानं
तु अनित्संज्ञके तद्धिते घकारे चरितार्थं । तस्माद्घजन्तादिति प्राप्यवलम्भिति वक्तव्यमेवेति चेन्न ॥ एवं

दोषः तत्र भस्य टेर्लोपे इति विहितो यष्टिलोपः स अंत्यस्यैव स्यादिति। ... दि अंत्यस्य लो

२ नच पचः ॥

तेर्मन्नृमस्येति लोपश्च ज्वरत्वरेत्यूठ ओमू इत्यत्र विहितो यः टिलोपः स अलोन्त्यपरिभाषया अंत्यस्य

स्यादिति। उणादीनि अव्युत्पन्नानि प्रातिपदिकानीति न दोषः। नच आसन्न [illegible] इत्यत्र संख्यया

व्यये तिसमासे बहुव्रीहौ संख्येय इति डच्प्रत्यये तिविंशतेर्डिति विधिहितो यस्तिशब्दस्य

लोपः स अंत्यस्यैव स्यात्तत्र तु। यादि इकारलोपस्तु ईसयस्येति चेति सिद्धः इति लोपविधे

इकारस्य वैयर्थ्यापत्त्या तत्सामर्थ्येन विंशतेस्तिशब्दस्यैव लोप इति न दोषः। नच अध्यासमभिसन्न अ

व्ययीभावेन समासे अनश्चेति टचि नस्तद्धित इति विहितो यष्टिलोपः स अंत्यस्यैव स्यादिति।

अंत्यस्य नकारस्य लोपे टाच्चा अलो गुण इति परत्वे इष्टसिद्धेर्न दोषः॥ नच अधिक चत्वारिं

शाद्यासो संख्येयेति समासे बहुव्रीहौ विंशतिडच्चि टेरिति विहितष्टिलोपोऽन्त्यस्यैव स्यादिति।

अंत्यलकारलोपे अनंतरस्य यस्यकारलोपे इष्टसिद्धेर्न दोषः॥ अतः नानर्थकपरिभाषया मास्तु।

न च तदशावेभो रित्यत्र दोषः भवन्नसंबुद्ध्येकवचने नसोविभाषा भवद्भगवदघवतामोच्चावस्य। रथोऽस

स्य रुः स्यात् अवस्य ओकारश्च इत्यनेन अवस्य ओकारो विहितः स अंत्यस्यैव स्यादिति। तत्र य

धंत्यस्य स्यात्तर्हि सूत्रे अस्येत्येवानियोहे अवस्येति व्यर्थं तत्सामर्थ्यादिशिष्टस्यावशब्दस्यैव

स्पवतीति न दोषः। नच अस्य स्थाने निर्देशः कुतः अघवच्छब्दे आद्य अकारस्यापि स्यात्तर्हि

अवस्येत्यस्य सार्थक्यात् तत्सामर्थ्यवर्णनमयुक्तमिति वाच्यं॥ अंत्यबाधे अंत्य सदेशस्येति परि

[illegible]

रणो [illegible]

॥पू० कौ०

भाषया आद्यस्याकारस्यैनेवस्यादिति न दोषः ॥ न च सा परिभाषा केषांचिन्मते नास्ति
तन्मते कथमिति चेत् ॥ वस्येत्येव सिद्धे अवस्येत्यस्य व्यर्थं स्पष्टमेवातः तत्साम
र्थ्यवर्णनं युक्तमिति न दोषः ॥ लाहृ पंचदशीनरस्यत्र दोषः लभ्यरानरातो डिनिश्चं दसौति सू
त्रेण तदस्य परिमाणमस्यर्थे पंचदशन् शब्दाड्डिनि प्रत्ययेन सांन्नरातरि लोपे प्रत्ययस्य सिद्धः प
वंत्रिंशीन इत्यत्रापि टेरलिहितोपे सिद्ध्यति अत्रोभयत्रापि अल्लोपपरिभाषाप्रवृत्तौ लकारनकारयो
र्लोपापत्तिः नानर्थकपरिभाषाप्रकारेः अनर्थस्येति चेत्तु लोपो न जायते आभीयासिद्ध्या निर्वा
हात् । आसिद्धवत्सूत्रभाष्याख्याने तु न दोषः इत्यन्यत्र । ताहृ प्राधस्यत्र दोषः अपूर्वकधूअर्थकमान्न
म इत्यतः घिञ्चिद्धत्रणीणोनुगागमेन सा श्विपि णिलोपे श्विलौदपस्येथे ऽपि न र्वाद्धतादि
लोपे आदिन्द्धो लिप्यति परिभाषया । अन्यथा ऽस्य नकारलोपे ओर्गुणाद्युत्पत्तिरिति ॥
अत्रापि न दोषः । यद्वृ [illegible] औत्सर्गोपसर्गहिदेरित्यस्यानुवर्तनं व्यर्थं स्यात् तत्सामर्थ्यादि
सिद्धस्येति ॥ नृहिमारयतोऽत्र दोषः मरुत्शब्दात्क्विपिचि इष्टप्रयोगेन टेर्लोपे वृद्धौ पिजर्तात
लोहूसिद्धात्परिभाषासत्वेन त्यथा अत्रापि ओर्गुणापत्तिरबाध्यलोपो तर अतो नार्थ
कपरिभाषा आवश्यकी ॥५८॥५९॥

ङपक्र०

२

KKSU LIBRARY
RAMTEK
441 106
M-1902
Dist. Nagpur

```
[OrderDescription]
,CREATED=21.10.20 15:48
,TRANSFERRED=2020/10/21 at 15:52:20
,PAGES=26
,TYPE=STD
,NAME=S0004321
,Book Name=M-1902-VYAKARAN PARISHKARA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,
```